# उपसंहारः

त्रैवर्णिकानां कृते साङ्गवेदाध्ययनानन्तरं धर्माधर्मरूपवेदार्थनिर्णयार्थं धर्माधर्मफलकमीमांसा शास्त्राध्ययनमपेक्षितमिति आशयः सप्रमाणेन प्रबन्धेऽस्मिन् चर्चितः। व्याकरणकाव्यकोशादीनामध्ययनानन्तरमपि सन्दिग्धवेदार्थनिर्णयो न भवतीति मीमांसा एव शरणी करणीया। षोडशाध्यायात्मकमीमांसाशास्त्रं जैमिनीप्रणीतम्। पठनपाठने द्वादशाध्यायस्यैव प्रसिद्धिरिति शास्त्रस्यास्य द्वादशलक्षणी इत्यप्यभिधानम्।

शास्त्रेऽस्मिन् सूत्राणां यथासम्भवलोकप्रसिद्धार्थस्यैव ग्रहणं भवति नाध्याहारपरिभाषादीनां प्रसक्तिः। किन्तु सूत्रवेदवाक्ययोः वैरुध्यं यत्र दृश्यते तत्र अध्याहारादिना व्याख्या क्रियते। एवं रूपेण वेदबोधितधर्माधर्मनिर्णयार्थं मीमांसाशास्त्रमत्यावश्यकमिति सिद्धं भवति। धर्माधर्मयोः प्रत्यक्षानुमानोपमानार्थापत्ति अनुपलब्ध्यादीनि न प्रमाणानि भवन्ति। इन्द्रियविषययोः निर्दुष्टसम्बन्धेनोत्पन्नं ज्ञानमेव प्रत्यक्षमिति कथ्यते। नैतत् धर्माधर्मयोः प्रमाणम्। यतोहि प्रत्यक्षं विद्यमानवस्तुनः प्रकाशकं भवति। धर्माधर्मौ न विद्यमानपदार्थौ। किन्तु कालन्तरभाविनौ। एवं योगिप्रत्यक्षस्यापि प्रत्यक्षाभिधानत्वात् न प्रमाणं धर्माधर्मयोः।

प्रत्यक्षं सविकल्पकनिर्विकल्पकभेदेन द्विविधम्। केवलसविकल्पकमेव प्रत्यक्षमित्यङ्गीकुर्वाणाः वैयाकरणाः, एवं केवलनिर्विकल्पकमेव प्रत्यक्षमिति अङ्गीकुर्वाणाः-बौद्धा अनेन निरस्ताः भवन्ति।

तदेव सूत्रकारस्यापि अभिमतम्। यदुक्तं 'सत्सम्प्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं विद्यमानोपलम्बनत्वात्'[1] इति। अतः न धर्मः वर्तमानकालीनः।

---

[1] जै. सू. 1/1/4

प्रत्यक्षं तु विद्यमानवस्तुना सहैव भवतीति धर्मं प्रति न प्रत्यक्षं निमित्तम्। एवमेव अनुमानमपि हेतुदर्शनेनैव भवतीति तदपि न धर्मे प्रमाणम्। एवं उपमानार्था-पत्यभावश्चापि निराक्रियते। किन्तु शब्दः प्रमाणम्। अत्र वैदिकवचसि मिथ्यात्वा-ज्ञानसंशयादिबाधकज्ञानाभावात् तत्प्रमाणमिति स्वीक्रियते। प्रवर्तकनिवर्तकञ्च वेदवाक्यम्, एवं तस्याविरोधिस्मृत्यादिवाक्येनोत्पन्नज्ञानम्, अज्ञातविषयकज्ञान-शास्त्रमेव शब्द इति स्वीक्रियते। धर्माधर्मौ ज्ञानरूपप्रकृतविषयोपयोगीति तदतिशयेन वर्णयन्ति मीमांसकाः। लौकिकशब्दोऽपि स्वतन्त्रं प्रमाणमेव इति न शब्दद्वैविध्यस्य अनुमानेऽन्तर्भावः। यतो हि अनुमानार्थं हेतुः पक्षे सपक्षे वा भवेत् न विपक्षे किन्तु शब्दस्थले तन्न निर्णेतुं शक्यते। अतः शब्दः प्रमाणम्। अतः धर्माधर्मनिर्णये शब्दः प्रमाणमेव।

एवं सर्वज्ञानानां स्वतस्त्वं मीमांसकैरङ्गीक्रियते। अर्थात् प्रामाण्यं ज्ञानोत्पादकसामग्र्या उत्पन्नं भवति, एवं ज्ञानग्राहकसामग्र्या एव गृहीतं भवति। अप्रामाण्यं तु कारणदोष एवं बाधकज्ञानेन गृहीतं भवति। तस्मात् वाक्यभिज्ञाः प्रामाण्यं स्वत अप्रामाण्यं परत इति प्रतिपादयन्ति। यतोहि प्रामाण्यस्य स्वतस्त्वात् वेदवाक्यजन्यज्ञानस्य प्रामाण्येऽपि नापत्तिप्रसङ्गः।

एवं प्रत्यक्षरूपेण अनुभूतघटपटादिज्ञानं निराकुर्वाणाः बौद्धाः बाह्यार्थालम्बनशून्यत्वं सिसाधयिषन्ति। तन्निरूपयितुं अनुमानप्रमाणमाश्रयतीति चेत् तन्न। यतोहि प्रत्यक्षभिन्नानुमानमत्र साध्यं न साधयति। यदि एवमुच्येत प्रत्यक्षं बाह्यवस्तुग्रहणे न समर्थमिति वक्तव्यं स्यात्। तन्नास्ति। एकज्ञाने ग्राह्यग्राहकोपपत्तिः न भवति। तस्मात् निरालम्बनवादेन शून्यवादेन वा बाह्यार्थनिराकरणं न वैदिकानां सम्मतम्।

एवं स्फोटवादविचारणानन्तरमेवं सिद्धान्तयन्ति मीमांसका:, वर्ण एव शब्द:। तदुक्तं वृत्तिकारेण 'अथ गौरित्यत्र' क: शब्द:? गकारोकारविसर्जनीय: इति भगवानुपवर्ष:।[1] सो वर्ण: नित्य:। तस्मात् तेन अर्थबोधकता उत्पद्यते। तस्मात् वैयाकरणसम्मतध्वनिना अभिव्यक्तस्फोटकल्पना अनावश्यकी एव। अनेकादृष्ट-कल्पनारूपगौरवदोषप्रसङ्ग:। वर्णस्य निरवयवत्वात् कपालतन्तुवत् तस्यावयवा: न प्रत्यक्षेण दृश्यन्ते। एवं रूपेण देशान्तरेऽपि कालान्तरेऽपि कस्य एकत्वं बुध्यते? अत: गत्वादिजातिरपि न सम्भवति। यतो हि तदर्थं आश्रयानेककल्पनाप्रसङ्ग:।

नैयायिकानां मते तु शब्द अनित्य:। तदनित्यत्वसाधकहेतोरपि बाधितत्वात् हेत्वाभास एव। यथा प्रयत्नानन्तरोपलब्धिरूपहेतु: शब्दाभिव्यक्तिपक्षे सार्थक:। यतोहि नित्यस्याभिव्यक्त्यर्थं यत्नो अवश्यंभावी। अत अनित्यरूपसाध्याभावेऽपि विद्यमानोक्तहेतुषु व्यभिचारात् अनित्यरूपसाध्यस्य साधको न भवेत्। एवं रूपेण अस्थिरत्वरूप अनित्यत्वसाधकहेतुरपि अप्रसिद्ध एव। अत एवमुच्यते उच्चारणप्रयत्नेन शब्दस्याभिव्यक्तिर्भवति नोत्पत्तिरिति। एवं 'शब्दं करोति' इत्यादिव्यवहारोऽपि नानित्यत्वसाधक:।

आत्यन्तिकगतिस्तु उच्चारणस्य अर्थबोधकत्वमेव। सोऽयमर्थबोध: शब्दस्यानित्यत्वस्वीकारे न सिध्यति। नैयायिकास्तु पूर्वपूर्ववर्णोच्चारणेन उत्पन्नसंस्कारसहितान्तिमवर्ण: अर्थप्रत्ययं जनयतीति वदन्ति। तेषां मते विनाशिवर्णानां साहित्यं कथं सम्भवेत्। वैयाकरणास्तु 'ध्वनिनाभिव्यक्त-स्फोटरूपशब्द एव अर्थबोधक:' इति वदन्ति। एतदपि न। अस्मिन् पक्षे अनेकादृष्टकल्पनाप्रसङ्ग: प्रदर्शित:। तस्मादर्थबोधप्रक्रियायां वर्णात्मकशब्दस्यैव नित्यत्वप्रतिपादनमुचितम्। तत् 'अयं गकार:' इत्यादि-अबाधितप्रत्ययेन साधितो

---

1 शा. भा. श. स्व. 45

भवति। स शब्दः विभुरिति उच्यते। तर्हि सर्वत्र उपलभ्येत इति चेत् तस्य व्यञ्जकध्वन्यधीनत्वात् सर्वत्र तन्नोपलभ्यते। अत एवं स्वीकरणे वेदाप्रामाण्यशङ्का अपि निरस्ता भवति।

आकृतिवादे जातावेव शक्तिरिति सिद्धान्तितम्। तत्तु सर्ववस्तुषु व्यावृत्तिप्रत्ययेन वा अनुवृत्तिप्रत्ययेन वा ज्ञायते। बौद्धाः असाधारणस्वलक्षण-व्यक्तिरेव शब्दार्थः, नैयायिकाः जातिविशिष्टव्यक्तौ शक्तिरिति च वदन्ति। बौद्धमते तु 'इयमपि गौः' इत्यादिरूपानुवृत्तिप्रत्ययो नोपपद्यते। तस्मान्नापोहशब्दार्थः। एवं लोके 'गामानय' इत्यादिषु गोत्वविशिष्टगवि एव प्रवृत्तिदर्शनात् जातावेव शक्तिः, जातिविशिष्टव्यक्तौ शक्तिर्गुर्वी इति एतदपास्तम्।

सामान्ये तावत् बौद्धमीमांसकयोरयमेव भेदः स्पष्टतया दृश्यते यत् मीमांसकाः भावरूपसामान्यमङ्गीकुर्वन्ति। बौद्धास्तु तदभावरूपं प्रतिपादयन्ति अपोहरूपं न किञ्चिदभावरूपसामान्यं भावपदार्थप्रतिपादनं विना सिध्यतीति सुविस्तरेण प्रतिपादितम्।

भावरूपसामान्यमसहमानाः योगाचारिणः जातिबुद्धिः वनबुद्धिवत् मिथ्या इति युक्तिं प्रदर्शयन्ति। यथा वृक्षातिरिक्तं वनमिति न किञ्चित् वस्तु विद्यते। तस्मात् वनबुद्धिः मिथ्या। तद्वत् जातिबुद्धिरपि। एवं जातिः सास्नादि-अवयवविशिष्टा न भवति। यतोहि अवयविषु गोत्वं वर्तते। सास्नाद्यवयवेषु गोत्वं न विद्यते। तस्मात् सास्नादिविशिष्टाकृतिरिति उपन्यासः न युक्तिसङ्गत इति चेत्।

तन्न। अत्र सास्नादिग्रहणं तु गोत्वप्रतिपादनार्थमेव। सास्नादीनां तु गोरूपावयविना सह सम्बन्धस्तु वर्तते एव। गोत्वजातिरपि अवयविनि गवि विद्यते सास्नाद्यवयवेष्वपि। अत एकार्थसमवायसम्बन्धेन सास्नाद्यवयवाः गौरूपाकृतौ

सम्बन्धमाप्नुवन्ति। अन्यजातीनामपेक्षया गोत्वेन सह सास्नाद्यवयवा: असाधारणसम्बन्धेन स्थिता इति कारणेन सास्नाद्यवयवा: गोत्वस्य परिवाचका: भवन्तीति। सास्नादिविशिष्टजातिरेव गोशब्दार्थ:।

एवं जातिद्वारा अर्थनित्यत्वप्रतिपादनानन्तरं शब्दार्थयो: सम्बन्धनित्यत्वं प्रतिपादनीयम्। एतयोर्वाच्यवाचकभावो लोकसिद्ध:। तस्मात्तत्र शङ्कते। शब्द: अर्थस्य वाचक इत्यवगमनानन्तरमपि यावत् तयोर्वाच्यवाचकभाव: नावगम्यते तावत् अर्थज्ञानं न भवति। तस्मात् प्रथमवारशब्दश्रवणे अर्थप्रतीति: न सर्वत्र भवति। तच्छक्ति: वृद्धव्यवहारेण गृह्यते। तद्व्यवहार अनादि:। अर्थात् नित्य:। एतदर्थमेव महासृष्टिमहाप्रलयौ मीमांसका: निराकुर्वन्ति। तर्हि वेदेषु वा स्मृतिषु वा तत्परकवचनं श्रूयतेति चेत् तादृशवाक्यानि अर्थवादपराणीति। अर्थवादानां सर्वदा स्वार्थे प्रामाण्याभाव इति अर्थवादाधिकरणे प्रदर्शितं भट्टपादै:।

एवं रूपेण धर्म: न प्रत्यक्ष: तत्र शब्द एव प्रमाणमिति प्रतिपादयितुं प्रवृत्तमौत्पत्तिकसूत्रम्। अत्र नैकानां दार्शनिकानां मतं खण्डयित्वा समस्तवेदराशे: व्यभिचारशङ्कानिरसनेन धर्माधर्मज्ञानार्थं वेद एव प्रमाणमिति सन्निरूपितम्। परन्त्वत्र धर्मानुष्ठातृरूपेण विद्यमानयजमानशब्दस्य किं तात्पर्यमिति जिज्ञासायामुच्यते शरीरातिरिक्त: कश्चिदात्मा एव यजमानशब्देन लक्ष्यते। स एव कर्ता सैव भोक्ता इति प्रतिपादनद्वारा वार्त्तिके औत्पत्तिकसूत्रस्य उपसंहार: कृत:।

अस्य सूत्रस्याध्ययनेन विषयोऽयं बुद्धौ आगच्छति यत् आदौ भाष्यकारोक्तप्रमाणलक्षणप्रतिपादनार्थं बौद्धानां निरालम्बनवादशून्यवदयो: खण्डनं कृत्वा शब्दविचारार्थं भट्टपादै: वैयाकरणमतं गृहीतम्। तन्मतस्फोटं निराकृत्य शब्दस्वरूपं सिद्धान्तयित्वा अर्थविचारार्थमाकृतिवाद: चर्चित:। तस्मिन् एव सन्दर्भे सामान्यविषये विद्यमानानां दार्शनिकानां विप्रतिपत्तिं निवारयितुं बौद्धानामपोहवाद-

वनवादौ निराकृतौ। एवमग्रे अर्थस्य नित्यत्वं प्रतिपाद्य शब्दार्थयोः सम्बन्धनित्यत्व-प्रतिपादितम्। सम्बन्धाक्षेपपरिहारप्रकरणे शब्दः नित्यः अर्थो नित्यः तयोः सम्बन्धः नित्य इति सिद्धान्तं दृढयित्वा तादृशशब्दार्थेन दृश्यमानकर्मणः सम्बन्धः यजमानस्य भवतीति प्रतिपादयितुमात्मवाद आरब्धः।

एवं रूपेण सर्वे सिद्धान्ताः पूर्वसम्बन्धनिष्ठाः सूत्रार्थप्रतिपादनशीला एवं वेदसत्यत्वप्रतिपादनपरका इति निर्वक्तुं शक्यते।

# ।। इति शम्।।